# ॥ શ્રીતારાશતનામસ્તોત્રમ્ ॥

.. shrItArAshatanAmastotram ..

sanskritdocuments.org

July 2, 2017

# .. shrItArAshatanAmastotram ..

# ॥ શ્રીતારાશતનામસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : tArAshatanAmastotram

File name : tArAshatanAmastotram.itx

Category : aShTottarashatanAma

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Shree Devi Kumar

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : svarNamAlAtantra

Acknowledge-Permission: Mahaperiaval Trust

Latest update : July 2, 2017

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

July 2, 2017

*sanskritdocuments.org*

# ॥ શ્રીતારાશતનામસ્તોત્રમ્ ॥

શ્રીશિવ ઉવાચ ॥

તારિણી તરલા તન્વી તારા તરુણવલ્લરી ।
તીરરૂપા તરી શ્યામા તનુક્ષીણપયોધરા ॥ ૧॥

તુરીયા તરલા તીવ્રગમના નીલવાહિની ।
ઉગ્રતારા જયા ચણ્ડી શ્રીમદેકજટાશિરાઃ ॥ ૨॥

તરુણી શામ્ભવીછિન્નભાલા ચ ભદ્રતારિણી ।
ઉગ્રા ચોગ્રપ્રભા નીલા કૃષ્ણા નીલસરસ્વતી ॥ ૩॥

દ્વિતીયા શોભના નિત્યા નવીના નિત્યનૂતના ।
ચણ્ડિકા વિજયારાધ્યા દેવી ગગનવાહિની ॥ ૪॥

અટ્ટહાસ્યા કરાલાસ્યા ચરાસ્યા દિતિપૂજિતા ।
સગુણા સગુણારાધ્યા હરીન્દ્રદેવપૂજિતા ॥ ૫॥

રક્તપ્રિયા ચ રક્તાક્ષી રુધિરાસ્યવિભૂષિતા ।
બલિપ્રિયા બલિરતા દુર્ગા બલવતી બલા ॥ ૬॥

બલપ્રિયા બલરતા બલરામપ્રપૂજિતા ।
અર્ધકેશેશ્વરી કેશા કેશવાસવિભૂષિતા ॥ ૭॥

પદ્મમાલા ચ પદ્માક્ષી કામાખ્યા ગિરિનન્દિની ।
દક્ષિણા ચૈવ દક્ષા ચ દક્ષજા દક્ષિણે રતા ॥ ૮॥

વજ્રપુષ્પપ્રિયા રક્તપ્રિયા કુસુમભૂષિતા ।
માહેશ્વરી મહાદેવપ્રિયા પઞ્ચવિભૂષિતા ॥ ૯॥

ઇડા ચ પિઙ્ગલા ચૈવ સુષુમ્ના પ્રાણરૂપિણી ।
ગાન્ધારી પઞ્ચમી પઞ્ચાનનાદિ પરિપૂજિતા ॥ ૧૦॥

તથ્યવિદ્યા તથ્યરૂપા તથ્યમાર્ગાનુસારિણી ।
તત્ત્વપ્રિયા તત્ત્વરૂપા તત્ત્વજ્ઞાનાત્મિકાઽનઘા ॥ ૧૧॥

તાણ્ડવાચારસન્તુષ્ટા તાણ્ડવપ્રિયકારિણી ।
તાલદાનરતા ક્રૂરતાપિની તરણિપ્રભા ॥ ૧૨॥

ત્રપાયુક્તા ત્રપામુક્તા તર્પિતા તૃપ્તિકારિણી ।
તારુણ્યભાવસન્તુષ્ટા શક્તિર્ભક્તાનુરાગિણી ॥ ૧૩॥

શિવાસક્તા શિવરતિઃ શિવભક્તિપરાયણા ।
તામ્રદ્યુતિસ્તામ્રરાગા તામ્રપાત્રપ્રભોજિની ॥ ૧૪॥

બલભદ્રપ્રેમરતા બલિભુગ્બલિકલ્પિની ।
રામરૂપા રામશક્તી રામરૂપાનુકારિણી ॥ ૧૫॥

ઇત્યેતત્કથિતં દેવિ રહસ્યં પરમાદ્ભુતમ્ ।
શ્રુત્વા મોક્ષમવાપ્નોતિ તારાદેવ્યાઃ પ્રસાદતઃ ॥ ૧૬॥

ય ઇદં પઠતિ સ્તોત્રં તારાસ્તુતિરહસ્યકમ્ ।
સર્વસિદ્ધિયુતો ભૂત્વા વિહરેત્ ક્ષિતિમણ્ડલે ॥ ૧૭॥

તસ્યૈવ મન્ત્રસિદ્ધિઃ સ્યાન્મમસિદ્ધિરનુત્તમા ।
ભવત્યેવ મહામાયે સત્યં સત્યં ન સંશયઃ ॥ ૧૮॥

મન્દે મઙ્ગલવારે ચ યઃ પઠેન્નિશિ સંયતઃ ।
તસ્યૈવ મન્ત્રસિદ્ધિસ્સ્યાદ્ગાણપત્યં લભેત સઃ ॥ ૧૯॥

શ્રદ્ધયાઽશ્રદ્ધયા વાપિ પઠેત્તારારહસ્યકમ્ ।
સોઽચિરેણૈવ કાલેન જીવન્મુક્તઃ શિવો ભવેત્ ॥ ૨૦॥

સહસ્રાવર્તનાદ્દેવિ પુરશ્ચર્યાફલં લભેત્ ।
એવં સતતયુક્તા યે ધ્યાયન્તસ્ત્વામુપાસતે ।
તે કૃતાર્થા મહેશાનિ મૃત્યુસંસારવર્ત્મનઃ ॥ ૨૧॥

ઇતિ સ્વર્ણમાલાતન્ત્રે તારાશતનામસ્તોત્રં સમાપ્તમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrItArAshatanAmastotram ..
was typeset using XƎLATEX 0.99996
on July 2, 2017

Please send corrections to *sanskrit@cheerful.com*